
# श्रीमद्भागवत रसिक कुटुंब

श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

## युगल गीत



रोम रोम श्रीकृष्ण में डूबा, अंग अंग से उठती प्रीत।
अद्भुत छटा निहार प्रभु की, गोपियां गाती युगल गीत।।

नारायणं(न्) नमस्कृत्य, नरं(ञ्) चैव नरोत्तमम्।
देवीं(म्) सरस्वतीं(म्) व्यासं(न्), ततो जयमुदीरयेत्

nārāyaṇaṃ(n) namaskṛtya, naraṃ(ñ)caiva narottamam
devīṃ(m) sarasvatīṃ(m) vyāsaṃ(n), tato jayamudīrayet

नामसङ्कीर्तनं(म्) यस्य, सर्वपापप्रणाशनम्।
प्रणामो दुःखशमनस्, तं(न्) नमामि हरिं(म्) परम्

nāmasaṅkīrtanaṃ(m) yasya, sarvapāpapraṇāśanam
praṇāmo duḥkhaśamanas, taṃ(n) namāmi hariṃ(m) param

श्रीमद्भागवतमहापुराणम्

दशमः स्कन्धः

॥ अथ पञ्चत्रिंशोऽध्यायः ॥

Śrīmadbhāgavatamahāpurāṇam

daśmaḥ skandhaḥ

atha pañcatriṃśo'dhyāyaḥ

### श्रीशुक उवाच

गोप्यः(ख्) कृष्णे वनं(म्) याते, तमनुद्रुतचेतसः ।
कृष्णलीलाः(फ्) प्रगायन्त्यो, निन्युर्दुःखेन वासरान् ॥ 1॥

**śrīśuka uvāca**

**gopyaḥ(kh) kṛṣṇe vanaṃ(m) yāte, tamanudrutacetasaḥ .**

**kṛṣṇalīlāḥ(ph) pragāyantyo, ninyurduḥkhena vāsarān .. 1..**

tamanudru+ tacetasaḥ, ninyur+ duḥkhena

**गोप्य ऊचुः**

**वामबाहुकृतवामकपोलो,**

**वल्गितभ्रुरधरार्पितवेणुम् ।**

**कोमलाङ्गुलिभिराश्रितमार्गं(ङ्),**

**गोप्य ईरयति यत्र मुकुन्दः ॥ 2॥**

**gopya ūcuḥ**

**vāmabāhukṛtavāmakapolo**

**valgitabhruradharārpitaveṇum .**

**komalāṅgulibhirāśritamārgaṃ(ṅ),**

**gopya īrayati yatra mukundaḥ .. 2..**

vāma+ bāhukṛtavā+ makapolo, valgita+ bhruradharār+ pitaveṇum

komalāṅ+ gulibhirā+ śritamārgaṃ(ṅ)

**व्योमयानवनिताः(स्) सह सिद्धैर्-**

**विस्मितास्तदुपधार्य सलज्जाः ।**

**काममार्गणसमर्पितचित्ताः(ख्),**

**कश्मलं(म्) ययुरपस्मृतनीव्यः ॥ 3॥**

**vyomayānavanitāḥ(s) saha siddhair-**

**vismitāstadupadhārya salajjāḥ .**

**kāmamārgaṇasamarpitacittāḥ(kh),**

**kaśmalaṃ(m) yayurapasmṛtanīvyaḥ .. 3..**

vyomayā+ navanitāḥ(s), vismitās+ tadu+ padhārya

kāma+ mārgaṇa+ samarpita+ cittāḥ(kh), yayu+ rapas+ mṛtanīvyaḥ

हन्त चित्रमबलाः(श्) शृणुतेदं(म्),

हारहास उरसि स्थिरविद्युत् ।

नन्दसूनुरयमार्तजनानां(न्),

नर्मदो यर्हि कूजितवेणुः ॥ 4॥

**hanta citramabalāḥ(ś) śṛṇutedaṃ(m)**

**hārahāsa urasi sthiravidyut .**

**nandasūnurayamārtajanānāṃ(n)**

**narmado yarhi kūjitaveṇuḥ .. 4..**

citra+ mabalāḥ(ś), nanda+ sūnu+ rayamārta+ janānāṃ(n)

वृन्दशो व्रजवृषा मृगगावो,

वेणुवाद्यहृतचेतस आरात् ।

दन्तदष्टकवला धृतकर्णा,

निद्रिता लिखितचित्रमिवासन् ॥ 5 ॥

**vṛndaśo vrajavṛṣā mṛgagāvo**

**veṇuvādyahṛtacetasa ārāt .**

**dantadaṣṭakavalā dhṛtakarṇā**

**nidritā likhitacitramivāsan .. 5..**

veṇu+ vādya+ hṛtacetasa, danta+ daṣṭa+ kavalā, likhita+ citra+ mivāsan

बर्हिणस्तबकधातुपलाशैर्-

बद्धमल्लपरिबर्हविडम्बः ।

कर्हिचित् सबल आलि स गोपैर्-

गाः(स्) समाह्वयति यत्र मुकुन्दः ॥ 6॥

barhiṇastabakadhātupalāśair-

baddhamallaparibarhaviḍambaḥ .

karhicit sabala āli sa gopair-

gāḥ(s) samāhvayati yatra mukundaḥ .. 6..

barhiṇas+ tabakadhā+ tupalāśair,

baddha+ malla+ paribarha+ viḍambaḥ , samāh+ vayati

तर्हि भग्नगतयः(स्) सरितो वै,

तत्पदाम्बुजरजोऽनिलनीतम् ।

स्पृहयतीर्वयमिवाबहुपुण्याः(फ्),

प्रेमवेपितभुजाः(स्) स्तिमितापः ॥ 7॥

tarhi bhagnagatayaḥ(s) sarito vai

tatpadāmbujarajo'nilanītam .

spṛhayatīrvayamivābahupuṇyāḥ(ph)

premavepitabhujāḥ(s) stimitāpaḥ .. 7..

bhagna+ gatayaḥ(s), tatpadām+ bujarajo'+ nilanītam

spṛhayatīr+ vayamivā+ bahupuṇyāḥ(ph), prema+ vepita+ bhujāḥ(s)

अनुचरैः(स्) समनुवर्णितवीर्य,

आदिपूरुष इवाचलभूतिः ।

वनचरो गिरितटेषु चरन्तीर्-

वेणुनाऽऽह्वयति गाः(स्) स यदा हि ॥ 8॥

anucaraiḥ(s) samanuvarṇitavīrya

ādipūruṣa ivācalabhūtiḥ .

vanacaro giritaṭeṣu carantīr-

veṇunā''hvayati gāḥ(s) sa yadā hi .. 8..

sama+ nuvarṇi+ tavīrya, ivā+ calabhūtiḥ, veṇunā''h+ vayati

**वनलतास्तरव आत्मनि विष्णुं(म्),**

**व्यं(ञ्)जयन्त्य इव पुष्पफलाढ्याः ।**

**प्रणतभारविटपा मधुधाराः(फ्),**

**प्रेमहृष्टतनवः(स्) ससृजुः(स्) स्म ॥ 9॥**

**vanalatāstarava ātmani viṣṇuṃ(m),**

**vyaṃ(ñ)jayantya iva puṣpaphalāḍhyāḥ .**

**praṇatabhāraviṭapā madhudhārāḥ(ph),**

**premahṛṣṭatanavaḥ(s) sasṛjuḥ(s) sma .. 9..**

vanalatās+ tarava, puṣpa+ phalāḍhyāḥ, praṇata+ bhāra+ viṭapā, prema+ hṛṣṭa+ tanavaḥ(s)

**दर्शनीयतिलको वनमाला-**

**दिव्यगन्धतुलसीमधुमत्तैः ।**

**अलिकुलैरलघुगीतमभीष्ट-**

**माद्रियन् यर्हि सन्धितवेणुः ॥ 10॥**

**darśanīyatilako vanamālā-**

**divyagandhatulasīmadhumattaiḥ .**

**alikulairalaghugītamabhīṣṭa-**

**mādriyan yarhi sandhitaveṇuḥ .. 10..**

darśanī+ yatilako, divyagandha+ tulasī+ madhumattaiḥ

alikulai+ ralaghugī+ tamabhīṣṭa, sandhi+ taveṇuḥ

**सरसि सारसहं(व्)सविहङ्गाश्-**

**चारुगीतहृतचेतस एत्य ।**

**हरिमुपासत ते यतचित्ता,**

**हन्त मीलितदृशो धृतमौनाः ॥ 11॥**

sarasi sārasahaṃ(v)savihaṅgāś-

cārugītahṛtacetasa etya .

harimupāsata te yatacittā

hanta mīlitadṛśo dhṛtamaunāḥ .. 11..

sārasa+ haṃ(v)sa+ vihaṅgāś, cāru+ gītahṛta+ cetasa, hari+ mupāsata, mīli+ tadṛśo

सहबलः(स्) स्रगवतं(व्)सविलासः(स्),

सानुषु क्षितिभृतो व्रजदेव्यः ।

हर्षयन् यर्हि वेणुरवेण,

जातहर्ष उपरम्भति विश्वम् ॥ 12॥

sahabalaḥ(s) sragavataṃ(v)savilāsaḥ(s)

sānuṣu kṣitibhṛto vrajadevyaḥ .

harṣayan yarhi veṇuraveṇa

jātaharṣa uparambhati viśvam .. 12..

sragavataṃ(v)+ savilāsaḥ(s), kṣiti+ bhṛto, veṇu+ raveṇa

महदतिक्रमणशं(ङ्)कितचेता,

मन्दमन्दमनुगर्जति मेघः ।

सुहृदमभ्यवर्षत् सुमनोभिश्-

छायया च विदधत् प्रतपत्रम् ॥ 13॥

mahadatikramaṇaśaṃ(ṅ)kitacetā

mandamandamanugarjati meghaḥ .

suhṛdamabhyavarṣat sumanobhiś-

chāyayā ca vidadhat pratapātram .. 13..

mahadati+ kramaṇaśaṃ(ṅ)+ kitacetā,

manda+ manda+ manugarjati, suhṛdamabh+ yavarṣat

विविधगोपचरणेषु विदग्धो,

वेणुवाद्य उरुधा निजशिक्षाः ।

तव सुतः(स्) सति यदाधरबिम्बे,

दत्तवेणुरनयत् स्वरजातीः ॥ 14॥

**vividhagopacaraṇeṣu vidagdho**

**veṇuvādya urudhā nijaśikṣāḥ .**

**tava sutaḥ(s) sati yadādharabimbe**

**dattaveṇuranayat svarajātīḥ .. 14..**

vividha+ gopa+ caraṇeṣu, yadā+ dharabimbe, dattaveṇu+ ranayat

सवनशस्तदुपधार्य सुरेशाः(श्),

शक्रशर्वपरमेष्ठिपुरोगाः ।

कवय आनतकन्धरचित्ताः(ख्),

कश्मलं(म्) ययुरनिश्चिततत्त्वाः ॥ 15॥

**savanaśastadupadhārya sureśāḥ(ś)**

**śakraśarvaparameṣṭhipurogāḥ .**

**kavaya ānatakandharacittāḥ(kh),**

**kaśmalaṃ(m) yayuraniścitatattvāḥ .. 15..**

savanaśas+ tadu+ padhārya,

śakraśarva+ parameṣṭhi+ purogāḥ

ānata+ kandha+ racittāḥ(kh), yayu+ raniścita+ tattvāḥ

निजपदाब्जदलैर्ध्वजवज्र-

नीरजां(ङ्)कुशविचित्रललामैः ।

व्रजभुवः(श्) शमयन् खुरतोदं(म्),

वर्ष्मधुर्यगतिरीडितवेणुः ॥ 16॥

**nijapadābjadalairdhvajavajra-**

**nīrajāṃ(ṅ)kuśavicitralalāmaiḥ .**

**vrajabhuvaḥ(ś) śamayan khuratodaṃ(m)**

**varṣmadhuryagatirīḍitaveṇuḥ .. 16..**

nijapadāb+ jadalair+ dhvaja+ vajra, nīrajāṃ(ṅ)+ kuśavicitra+ lalāmaiḥ

varṣma+ dhuryagati+ rīḍita+ veṇuḥ

**व्रजति तेन वयं(म्) सविलास,**

**वीक्षणार्पितमनोभववेगाः ।**

**कुजगतिं(ङ्) गमिता न विदामः(ख्),**

**कश्मलेन कबरं(म्) वसनं(म्) वा ॥ 17॥**

**vrajati tena vayaṃ(m) savilāsa**

**vīkṣaṇārpitamanobhavavegāḥ .**

**kujagatiṃ(ṅ) gamitā na vidāmaḥ(kh)**

**kaśmalena kabaraṃ(m) vasanaṃ(m) vā .. 17..**

vīkṣaṇār+ pitamano+ bhavavegāḥ

**मणिधरः(ख्) क्वचिदागणयन् गा,**

**मालया दयितगन्धतुलस्याः ।**

**प्रणयिनोऽनुचरस्य कदां(व्)से,**

**प्रक्षिपन् भुजमगायत यत्र ॥ 18॥**

**maṇidharaḥ(kh) kvacidāgaṇayan gā**

**mālayā dayitagandhatulasyāḥ .**

**praṇayino'nucarasya kadāṃ(v)se,**

**prakṣipan bhujamagāyata yatra .. 18..**

kvacidā+ gaṇayan, dayita+ gandha+ tulasyāḥ, praṇayino'+ nucarasya

क्वणितवेणुरववं(ञ्)चितचित्ताः(ख्),
कृष्णमन्वसत कृष्णगृहिण्यः ।
गुणगणार्णमनुगत्य हरिण्यो,
गोपिका इव विमुक्तगृहाशाः ॥ 19॥

kvaṇitaveṇuravavaṃ(ñ)citacittāḥ(kh)
kṛṣṇamanvasata kṛṣṇagṛhiṇyaḥ .
guṇagaṇārṇamanugatya hariṇyo
gopikā iva vimuktagṛhāśāḥ .. 19..

kvaṇita+ veṇu+ ravavaṃ(ñ)+ citacittāḥ(kh), kṛṣṇa+ man+ vasata
guṇagaṇār+ ṇamanugatya, vimukta+ gṛhāśāḥ

कुन्ददामकृतकौतुकवेषो,
गोपगोधनवृतो यमुनायाम् ।
नन्दसूनुरनघे तव वत्सो,
नर्मदः(फ्) प्रणयिनां(म्) विजहार ॥ 20॥

kundadāmakṛtakautukaveṣo
gopagodhanavṛto yamunāyām .
nandasūnuranaghe tava vatso
narmadaḥ(ph) praṇayiṇāṃ(m) vijahāra .. 20..

kundadā+ makṛta+ kautukaveṣo,
gopa+ godha+ navṛto, nandasū+ nuranaghe

मन्दवायुरुपवात्यनुकूलं(म्),
मानयन् मलयजस्पर्शेन ।
वन्दिनस्तमुपदेवगणा ये,
वाद्यगीतबलिभिः(फ्) परिवव्रुः ॥ 21॥

mandavāyurupavātyanakūlaṃ(m)

mānayan malayajasparśena .

vandinastamupadevagaṇā ye

vādyagītabalibhiḥ(ph) parivavruḥ .. 21..

manda+ vāyurupa+ vātya+ nakūlaṃ(m), Malaya+ jasparśena

vandinas+ tamupa+ devagaṇā, vādya+ gīta+ balibhiḥ(ph)

वत्सलो व्रजगवां(म्) यदगध्रो,

वन्द्यमानचरणः(फ्) पथि वृद्धैः ।

कृत्स्नगोधनमुपोह्य दिनान्ते,

गीतवेणुरनुगेडितकीर्तिः ॥ 22॥

vatsalo vrajagavāṃ(m) yadagadhro

vandyamānacaraṇaḥ(ph) pathi vṛddhaiḥ .

kṛtsnagodhanamupohya dinānte

gītaveṇuranugeḍitakīrtiḥ .. 22..

vandyamā+ nacaraṇaḥ(ph), kṛtsna+ godha+ namupohya, gīta+ veṇuranu+ geḍita+ kīrtiḥ

उत्सवं(म्) श्रमरुचापि दृशीना-

मुन्नयन् खुररजश्छुरितस्रक् ।

दित्सयैति सुहृदाशिष एष,

देवकीजठरभूरुडुराजः ॥ 23॥

utsavaṃ(m) śramarucāpi dṛśīnā-

munnayan khurarajaśchuritasrak .

ditsayaiti suhṛdāśiṣa eṣa

devakījaṭharabhūruḍurājaḥ .. 23..

khura+ rajaś+ churita+ srak, devakī+ jaṭharabhū+ ruḍurājaḥ

मदविघूर्णितलोचन ईषन्,

मानदः(स्) स्वसुहृदां(म्) वनमाली ।

बदरपाण्डुवदनो मृदुगण्डं(म्),

मण्डयन् कनककुण्डललक्ष्म्या ॥ 24॥

**madavighūrṇitalocana īṣan-**

**mānadaḥ(s) svasuhṛdāṃ(m) vanamālī .**

**badarapāṇḍuvadano mṛdugaṇḍaṃ(m)**

**maṇḍayan kanakakuṇḍalalakṣmyā .. 24..**

madavighūr+ ṇita+ locana, badara+ pāṇḍu+ vadano, kanaka+ kuṇḍala+ lakṣmyā

यदुपतिर्द्विरदराजविहारो,

यामिनीपतिरिवैष दिनान्ते ।

मुदितवक्त्र उपयाति दुरन्तं(म्),

मोचयन् व्रजगवां(न्) दिनतापम् ॥ 25॥

**yadupatirdviradarājavihāro**

**yāminīpatirivaiṣa dinānte .**

**muditavaktra upayāti durantaṃ(m)**

**mocayan vrajagavāṃ(n) dinatāpam .. 25..**

yadupatir+ dvira+ darāja+ vihāro, yāminī+ pati+ rivaiṣa, mudi+ tavaktra

श्रीशुक उवाच

एवं(म्) व्रजस्त्रियो राजन्, कृष्णलीला नु गायतीः ।

रेमिरेऽहः(स्)सु तच्चित्तास्- तन्मनस्का महोदयाः ॥ 26॥

**śrīśuka uvāca**

**evaṃ(m) vrajastriyo rājan, kṛṣṇalīlā nu gāyatīḥ .**

**remire'haḥ(s)su taccittās- tanmanaskā mahodayāḥ .. 26..**

tac+ cittās

**इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां(न्)**
**दशमस्कन्धे पूर्वार्धे वृन्दावनक्रीडायां(ङ्) गोपिकायुगलगीतं(न्)नाम पञ्चत्रिंशोऽध्यायः ॥**

**iti śrīmadbhāgavate mahāpurāṇe pāramahaṃsyāṃ saṃhitāyāṃ(n)**
**daśamaskandhe pūrvārdhe vṛndāvanakrīḍāyāṃ(ṅ) gopikāyugalagītaṃ(n)**
**nāma pañcatriṃśo'dhyāyaḥ ..**

**ॐ पूर्णमदः(फ्) पूर्णमिदं(म्)पूर्णात्पूर्णमुदच्यते**
**पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।।**
**ॐ शान्तिः(श्)शान्तिः(श्)शान्तिः।।**

**Om Pūrṇamadah(ph) Pūrṇamidaṃ(m) PūrṇātPūrṇamudacyate|**
**Pūrṇasya Pūrṇamādāya Pūrṇamevāvashiṣyate ||**
**Om Shantih(ś) Shantih(ś) Shantih ||**

